"जात्यर्कसम्पाककरञ्जदन्ती-
सिन्धूत्थसौवर्च्चलयावशूकैः ।
वर्त्तिः कृता हन्त्यचिरेण नाडीं
स्नुक्क्षीरपिष्टा सह चित्रकेण ॥
नाड्याः शस्त्रेण वदनं इहत् कृत्वा प्रवेशयेत् ।
कुशलो वस्तिविधिना तैलं जात्यादिसाधितम् ॥
एवमन्यच्च यत्तैलं घृतं वा स्वरसं तथा ।
यत्तैलं यद्घृतं पक्वं स्वरसं वा तथैव च ॥"
इति वा पाठः ॥
"नाड्या अभ्यन्तरे वैद्यो लघुहस्तः प्रवेशयेत् ।
कर्पूरकरजैस्तैलं सिद्धार्थकभवं भिषक् ।
पचेत् सिन्दूरकल्केन नाडीदुष्टव्रणापहम् ॥
गुग्गुलुत्रिफलाव्योषैः समांशैराज्ययोजितम् ।
अक्षप्रमाणां गुटिकां खादेच्छीताम्बुना नरः ॥
नाडीदुष्टव्रणं शूलमुदावर्त्तभगन्दरम् ।
गुल्मञ्च गुदजान् हन्यात् पक्षिराट् पन्नगानिव ॥"
सप्ताङ्गो गुग्गुलुः । इति नाडीव्रणाधिकारः ॥ * ॥
भगन्दरस्य निदानं चिकित्सा च भगन्दरशब्दे द्रष्टव्यम् । उपदंशस्य निदानादुपदंशशब्दे द्रष्टव्यम् ॥ * ॥ अथोपदंशस्य चिकित्सा ।
"उपदंशेषु सर्व्वेषु स्निग्धस्विन्नस्य देहिनः ।
मेढ्रमध्ये शिरां विध्येत् पातयेद्वा जलौकसः ॥
सद्यो निर्हृतदोषस्य रुक्शोथावुपशाम्यतः ।
पाको निवार्य्यो यत्नेन शिश्नक्षयकरः स यत् ॥
वटप्ररोहार्ज्जुनजम्बुलोध्र-
पथ्याहरिद्रारचितः प्रलेपः ।
यथा तथा शोथमपाकरोति
सर्व्वोपदंशेषु ततो हितोऽयम् ॥
उपदंशेषु पक्वेषु व्रणप्रक्षालनं हितम् ।
त्रिफलायाः कषायेण भृङ्गराजरसेन वा ॥
नीलोत्पलं सकुमुदं पद्मं सौगन्धिकं तथा ।
एष चूर्णं धूलनार्थं प्रलेपश्चात्र शस्यते ॥
बब्बूलदलचूर्णेन रजसा दाडिमत्वचः ।
गुण्ठनात्तद्व्रणे कुर्य्याल्लेपं पूगफलेन वा ॥
दहेत् कटाहे त्रिफलां तन्मसी मधुसंयुता ।
प्रलेपेनोपदंशस्य व्रणः सद्यः प्ररोहयेत् ॥
पटोलनिम्बत्रिफलाकिरात-
क्वाथं पिबेद्वा खदिरासनाभ्याम् ।
सगुग्गुलुं वा त्रिफलायुतं वा
सर्व्वोपदंशोपहरः प्रयोगः ॥
भूनिम्बनिम्बत्रिफलापटोल-
करञ्जधात्रीखदिरासनानाम् ।
कषायकल्कैः घृतमाशु पक्वं
सर्व्वोपदंशोपहरं प्रदिष्टम् ॥
इति भूनिम्बादिघृतम् ॥
"घृतानि यानि प्रोक्तानि कुष्ठे नाडीव्रणे व्रणे ।
उपदंशे प्रयोज्यानि सेकाभ्यञ्जनभोजने ॥
क्षारसूत्रेण संछिद्य लिङ्गवर्त्तिमशेषतः ।
दहेच्च तान्ततस्ताभ्यां चिकित्सां व्रणवच्चरेत् ॥"
इत्युपदंशाधिकारः ॥ * ॥
शूकदोषाधिकारः शूकदोषशब्दे द्रष्टव्यः । इति भावप्रकाशः ॥ * ॥ अथ व्रणनाशकतैलम् ।

"उडुम्बरं वटप्लक्षं जम्बुद्वयमथार्ज्जुनम् ।
पिप्पलञ्च कदम्बञ्च पलाशलोध्रतिन्दुकम् ॥
मधूकमाम्रसर्ज्जञ्च बदरं पद्मकेशरम् ।
शिरीषबीजं कतकमेतत् क्वाथेन साधितम् ।
तैलं हन्ति व्रणालेपाच्चिरकालभवानपि ॥"
इति गारुडे १६८ अध्यायः ॥
व्रणकृत्, पुं, (व्रणं करोतीति । कृ + क्विप् । तुगागमश्च ।) भल्लातकः । इति रत्नमाला । क्षतकारके, त्रि ॥
व्रणकेतुघ्नी, स्त्री, (व्रणकेतुं हन्तीति । हन + टक् । ङीप् ।) दुग्धफेनीक्षुपः । इति राजनिर्घण्टः ॥
व्रणद्विट्, [ष्] पुं, (व्रणस्य द्विट् शत्रुः ।) ब्राह्मणयष्टिका । इति शब्दचन्द्रिका । व्रणद्वेषके, त्रि ॥
व्रणहः, पुं, (व्रणं हन्तीति । हन + डः ।) एरण्डवृक्षः । इति शब्दचन्द्रिका । व्रणघातके, त्रि ॥
व्रणहा, स्त्री, (व्रणं हन्तीति । हन + डः । स्त्रियां टाप् ।) गुडूची । इति शब्दचन्द्रिका ॥
व्रणहृत्, पुं, (व्रणं हरतीति । हृ + क्विप् । तुक् च ।) कलिकारीवृक्षः । इति राजनिर्घण्टः ॥
व्रणारिः, पुं, (व्रणस्य अरिः शत्रुः ।) बोलम् । अगस्त्यवृक्षः । इति राजनिर्घण्टः ॥
व्रतं, क्ली पुं, भक्षणम् । इत्युणादिकोषः ॥ (व्रियते इति । वृञ् वरणे + बाहुलकात् अतच् । स च कित् ।) पुण्यजनकोपवासादि । तत्पर्य्यायः । नियमः २ पुण्यकम् ३ । इत्यमरः ॥ नियामः ४ संयमः ५ । इति शब्दरत्नावली ॥ अथ व्रतविधिः । तदारम्भप्रतिष्ठयोर्व्वर्ज्यकालमाह ज्योतिषे । गुरोर्भृगोरस्तबाल्ये वार्द्धके सिंहगे गुरौ इति । इन्दौ बाले दिनत्रयमित्यन्तम् । मठप्रतिष्ठातत्त्वादावनुसन्धेयम् ॥ * ॥ बुधाष्टमीव्रते विशेषो राजमार्त्तण्डोक्तो यथा,—
"द्विजेन्द्रसुतसंयुक्ता पूर्णा या च सिताष्टमी ।
तस्यां नियमकर्त्तारो न स्युः खण्डितसम्पदः ॥
पतङ्गे मकरे याते देवे जाग्रति माधवे ।
बुधाष्टमीं प्रकुर्वीत वर्ज्जयित्वा तु चैत्रकीम् ॥
प्रसुप्ते च जगन्नाथे सन्ध्याकाले मघौ तथा ।
बुधाष्टमीं न कुर्वीत कृता हन्ति पुराकृतम् ॥"
अथ व्रतानुष्ठानम् । तत्र देवलः ।
"अभुक्त्वा प्रातराहारं स्नात्वा चैव समाहितः ।
सूर्य्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेत् ॥
ब्रह्मचर्य्यं तथा शौचं सत्यमामिषवर्ज्जनम् ।
व्रतेष्वेतानि चत्वारि वरिष्ठानीति निश्चयः ॥"
अत्र प्रातरित्यस्याभुक्त्वेत्यत्र नान्वयः । किन्तु व्रतमित्यनेनान्वयोऽभ्यर्हितत्वात् ।
"प्रातः सङ्कल्पयेद्विद्वानुपवासव्रतादिकम् ।
नापराह्णे न मध्याह्ने पित्र्यकालौ हि तौ स्मृतौ ॥"
इति वराहपुराणैकवाक्यत्वाच्च । व्रतञ्चाभुक्त्वा प्रातराहारमिति ।
"मुनिभिर्द्दिरशनं प्रोक्तं विप्राणां मर्त्त्यवासिनां नित्यम् ।
अहनि च तथा तमस्विन्यां सार्द्धप्रहरयामान्तः ॥"

इति छन्दोगपरिशिष्टादेकाहारं पूर्व्वदिने कृत्वा परदिने स्नात्वाचम्य सूर्य्यादिदेवेभ्यो निवेद्य । ॐ सूर्य्यः सोमो यम इत्यादिमन्त्रेण सान्निध्यं प्रार्थ्य व्रतमाचरेत् । ततः सङ्कल्पयेत् । यद्वा सूर्य्यादिदेवेभ्यो निवेद्य पूजनीयद्रव्यादि दत्त्वा व्रतमाचरेत् व्रतं कुर्य्यात् । तद्विधानञ्च शान्तिपर्व्वणि ।
"गृहीत्वौडुम्बरं पात्रं वारिपूर्णमुदङ्मुखः ।
उपवासन्तु गृह्णीयात् यद्वा वार्य्येव धारयेत् ॥" * ॥
कर्म्मादौ सूर्य्यपूजामाह ब्रह्मपुराणम् ।
"यावन्न दीयते चार्घ्यं भास्कराय महात्मने ।
तावन्न पूजयेद्विष्णुं शङ्करं वा महेश्वरीम् ॥"
नवग्रहपूजामाह मत्स्यपुराणम् ।
"नवग्रहमखं कृत्वा ततः कर्म्म समारभेत् ।
अन्यथा फलदं पुंसां न काम्यं जायते क्वचित् ॥"
आदित्यादिपूजामाह पद्मपुराणम् ।
"आदित्यं गणनाथञ्च देवीं रुद्रं यथाक्रमम् ।
नारायणं विशुद्धाख्यं अन्ते च कुलदेवताम् ॥"
यत्तु ।
"देवतादौ यदा मोहात् गणेशञ्च न पूजयेत् ।
तदा पूजाफलं हन्ति विघ्नराजो गणाधिपः ॥"
इत्यनेन गणेशपूजनस्यादित्वमुक्तं तत् सूर्य्यपूजेतरपरम् । कुलदेवतेत्यत्र कुलाद्युपलक्षणम् ।
"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे ।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥"
तत्र विशेषयति मत्स्यपुराणम् ।
"गर्भिणी सूतिका नक्तं कुमारी च रजस्वला
यदाशुद्धा तदान्येन कारयेत् क्रियते सदा ॥
उपवासाशक्तौ तु नक्तं भोजनं कुर्वीत ।
"उपवासेष्वशक्तानां नक्तं भोजनमिष्यते ।"
इति वचनान्तरात् अशुद्धा चेत् पूजां कारयेत् । कायिकञ्चोपवासादिकं सदा शुद्धया अशुद्धया वा स्वयं क्रियते । अत्यन्तासामर्थ्ये पुत्रादिप्रतिनिधिद्वारा उपवासः कार्य्यः । तदभावेऽनुकल्पः । गरुडपुराणम् ।
"भार्य्या भर्त्तृव्रतं कुर्य्यात् जायायास्तु पतिस्तथा ।
असामर्थ्यात् द्वयोस्ताभ्यां व्रतभङ्गो न जायते ॥
पुत्रं वा विनयोपेतं भगिनीं भ्रातरं तथा ।
एषामभाव एवान्यं ब्राह्मणं विनियोजयेत् ॥"
आरब्धव्रतस्यासमाप्तौ मरणेऽपि तत्फलप्राप्तिमाहाङ्गिराः ।
"यो यदर्थं चरेद्धर्म्मं न समाप्य मृतो भवेत् ।
स तत्पुण्यफलं प्रेत्य प्राप्नुयान्मनुरब्रवीत् ॥"
प्रेत्य परलोके । शाम्बपुराणम् ।
"लोभान्मोहात् प्रमादाद्वा व्रतभङ्गो यदा भवेत् ।
उपवासत्रयं कुर्य्यात् कुर्य्याद्वा केशमुण्डनम् ॥"
मोहो भ्रमः । प्रमादोऽनवधानता । वाशब्दः समुच्चये तेन मुण्डनञ्च कार्य्यं मुण्डनाकरणे द्विगुणं प्रायश्चित्तम् । उपवासत्रयाशक्तौ चतुर्विंशतिपणा देयाः । पद्मपुराणम् ।